National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 152-156
© 2026 NJHSR
www.sanskritarticle.com

**डां. नरेन्द्र कुमारः**
सहायकाचार्य दर्शनशास्त्र,
हि.आ.सं.महा.जांगला,
शिमला, हि.प्र

**Correspondence:**
**डां. नरेन्द्र कुमारः**
सहायकाचार्य दर्शनशास्त्र,
हि.आ.सं.महा.जांगला,
शिमला, हि.प्र

# भारतीयदर्शनेषव्यक्तित्वविकासोपायाः।

**डां. नरेन्द्र कुमारः**

**शोधसारांशः**

व्यक्तित्वं किमस्ति?(Personality Development) व्यक्तित्वं व्यक्तेः स्वीयं वैशिष्टयम् ( निजी विशेषता) व्यक्तेः असामान्यगुणाः। प्रायः जनाः व्यक्तित्वविषये अनभिज्ञाः सन्ति, समाजे व्यक्तित्वविकासनाम्ना बाह्य रुपधनवस्त्रोपरि एव बलं ददति। मनोवैज्ञनिकानामनुसारं मानवव्यवहारस्य सर्वे पक्षाः व्यक्तित्वान्तर्गतं सन्ति । व्यक्तित्वं मनोविज्ञानस्य प्रमुखशाखा अस्ति । संस्कृतवाङ्गमये व्यक्तित्वविकासाय बहवः उपायाः सन्ति। भारतीयचिन्तनधारायां व्यक्तित्वस्य सिद्धान्तानां विवेचनं – वेद, उपनिषद्, सांख्य, योग, न्याय, जैनागम, बौद्धदर्शनेषु विस्तरेण प्राप्यते। दर्शनेषु प्रधानतया व्यक्तित्वस्यार्थः जीवात्मा अस्ति। संप्रत्ययोऽयं व्यक्तित्वस्य मनोदैहिक सरंचनया सम्बन्धो न अस्ति परञ्च तस्य नैतिकाध्यात्मिकञ्च पक्षेण सम्बन्धितोऽस्ति । उक्तञ्च-

**स्वभावो नोपदेशेन शक्यते कर्त्तुमन्यथा।**
**सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ।।**[1]

**मुख्यशब्दाः-**व्यक्तित्व, परसोना, पर्सनाल्टी, परिधारणं, प्रतिबिम्बः, आत्महीनता, स्नायुतन्त्रं, प्रत्युहवारकं, अन्तर्क्रियायाः, एकांशेन, उरीकृत्य, अवनतिः, आत्मानुभूतिः, आत्माभिव्यक्तिः, संप्रत्ययः, शशलूकवत्, सुपर्णायातुमुत, गृध्रयातुं, मदवृत्तिः, आत्मनिरीक्षणम्।

**प्रस्तावना**- संसारे सर्वेऽपि जनाः व्यक्तित्व दृष्टया समानाः न भवन्ति, तत्र तावत् एकं निर्दिष्टस्तरः सामान्यः इत्युच्यन्ते । मानवः व्यक्तित्वस्य विकासाय सततं प्रयतते परञ्च भवनस्य दृढता तदा भवति यदा स्तम्भः दृढः भवति। आधुनिकसामाजिकपरिप्रेक्ष्ये व्यक्तित्वस्य विकासाय संघर्षः दृश्यते। व्यक्तित्वविकासाय विद्वत्सु जनेषु च सहस्त्रेभ्यः वर्षेभ्यःचर्चा समागच्छति । भारतीयचिन्तनधारायां विशेषतः संस्कृकवाङ्गमये व्यक्तित्वस्य सिद्धान्तानां विवेचनं- वेद – उपनिषद्-स्मृति – दर्शनेषु विस्तरेण प्राप्यते । अत्र मुख्यतया व्यक्तित्व अर्थात् जीवात्मा। संप्रत्ययोऽयं व्यक्तित्वस्य मनोदेहिक संरचनया सम्बद्धो नास्ति अपितु नैतिकाध्यात्मिकञ्च पक्षेण सम्बद्धोऽस्ति ।व्यक्तित्व शब्दस्य प्रयोगः विभिन्नार्थेषु भवति । व्यक्तित्वं कुत्रचित व्यवहारः, कुत्रचित् मानसिक क्षमतां च प्रकटयति । अतः व्यक्तित्व शब्दस्य वास्तविकार्थं तथा तस्य विविधस्वरूपाणां विषये ज्ञानमावश्यकम् अस्ति । पाश्चात्य दृष्ट्या आङ्गलभाषायां व्यक्तित्व-शब्दः 'पर्सनाल्टी' शब्दस्य हिन्दी रूपान्तरणं अस्ति । पर्सनाल्टी शब्दोत्पत्तिःलैटिन भाषायाः 'परसोना' तः भवति। यस्यार्थः एक प्रकारस्य परिधानं अस्ति । यथा नाटककारः मञ्चोपरि विशेषभूमिका निमित्तं परिधारणं धार्यति । तेन (मुखौटा) परिधारणेन तस्य व्यक्तित्वं वास्तविकतया भिन्नः भवति। अतःपाश्चात्य व्युत्पत्तिदृष्टया व्यक्तित्वं व्यक्तेः बाह्यगुणाधारे ज्ञातुं शक्यते, परञ्च एतेन व्यक्तित्वस्य वास्तविकार्थं स्पष्टं न भवति। एवं पाश्चात्य जगति व्यक्तित्वसिद्धान्तोत्पत्तिः पौराणिक्, ग्रीक्, हिप्पोक्रेटस, प्लेटो, तथाच अरस्तु द्वारा मानव स्वभाव एवं व्यवहारविषये व्यक्तानां विचारैः भवति। आधुनिक व्यक्तित्वसिद्धान्तेषु मनोवैज्ञानिकानाम् पौराणिकानाञ्च प्रतिविम्बः प्राप्यन्ते।

व्यक्तित्वं किमस्ति ? वस्तुतः विषयेऽस्मिन् प्रायशः जनाः अनभिज्ञाः सन्ति । व्यक्तित्वविकासस्य सम्बन्धः अस्माकं मूलचेतना, अथवा अहं इत्यनेन अस्ति ।

संस्कृते व्यक्तित्वस्य अर्थः- पृथकसत्ता 'निजी विशेषता' वैशिष्टयः,व्यक्तेःअसामान्यगुणाः।

वि+अञ्ज्+क्तिन् ।

व्यक्तित्व विकासस्य पक्षद्वयम्- 1. आत्मानुभूतिः 2. आत्माभिव्यक्तिः।

1.आत्मानुभूतिः-आत्मानुभूतिः विशुद्धरूपेण दार्शनिकपक्षः अस्ति। यः सत्यमन्वेषयति यत् कोऽहम्? कुतः समागतोऽस्मि? मम कार्यः किमस्ति?

2 आत्माभिव्यक्तिः-इयं व्यक्तित्वविकासस्य द्वितीय चरणं अस्ति । अत्र शिक्षा-समाज-धर्म-मानवजीवनस्य व्यवहारपक्षः अस्ति।

मूल्यानां निर्धारणे शिक्षा एवं दर्शनशास्त्रं द्वयोः सम्बन्धः अस्ति। शिक्षा छात्रेषु मूल्यानां विकासः करोति । मूल्यरहिता शिक्षा समाज व्यक्तेः च अवरोधं करोति । के मूल्याः तात्कालीन् समाजोपयोगिनः सन्ति एतस्य निर्धारणं दर्शनेन भवति। दर्शनशास्त्रं शिक्षायाः मार्गदर्शनं करोति। दर्शनशास्त्रस्य सर्वाधिकं वृहत् कार्यं शिक्षायै दिक्-दानमस्ति । प्राचीनकालाद् एव दर्शनशास्त्रः एतस्य निर्वहनं करोति । शिक्षादर्शनशास्त्र्योः घनिष्ठसम्बन्धः वर्तते। शिक्षा व्यवहारः अस्ति तु दर्शनशास्त्रसिद्धान्तः। दर्शनशास्त्रः सत्यस्यानवेषणं करोति, शिक्षा सत्यमनुसरति। सत्यान्वेषणोपरि कालपरिस्थितिनां च प्रभावःपतति। यस्मात् विचारेषु परिवर्तनं भवति । एतानि परिवर्तनानि शिक्षायां अपि परिवर्तनं करोति।

शिक्षायाः आधारचतुष्टयं वर्तते- 1. दार्शनिकाधारः 2. सामाजिकाधारः 3. वैज्ञानिकाधारः 4. मनोवैज्ञिकाधारः।

1. दार्शनिकाधारः एव मुख्यः अस्ति, अयमेव शिक्षायाः तलः वर्तते । सामाजिकाधारः शिक्षां समाजेन योजयति। वैज्ञानिकमनोवैज्ञानिका-धारयोः शिक्षायां पाठ्क्रमाणां विधिनाञ्च निर्धारणं भवति। दर्शनचिन्तनस्य क्षेत्रः अमूर्तः वर्तते। परञ्च समाजात् भिन्नः नास्ति। समाजस्य कानि कृत्यानि उचितानि कानि अनुचितानि वर्तन्ते, नैतिकाचरणेन मानवोत्थानः कथं भवेत्? इयं दर्शनस्य समस्या अस्ति। अतः व्यक्तित्वनिर्माणे यथा शिक्षायाः महत्त्वं अस्ति तथैव दर्शनस्य ।

शक्तिर्द्विधा भवति- दैवीशक्तिः 2. आसुरिशक्तिः।

शिक्षायाः कार्यं केवलं दैवीशक्तिः प्रकाश्ने नास्ति, अपितु मानवस्य अन्तःकरणात् आसुरिशक्तेः निर्मूलनाय अपि वर्तते । आसुरिशक्तेः नाशात् 'सत्यं शिवं सुन्दरम् ' एतस्य बोधः भवति । तथा एतस्य बोधस्य कारणं दर्शनशास्त्रं एव अस्ति ।

ईश्वरः प्रत्येकाय स्वं स्वपरिवारं समाजस्य च विकासार्थं समानं अवसरं ददति। परञ्च केचन् एव स्वपुरुषार्थेण कर्तव्यनिष्ठया समर्पणेन च स्वं स्वपरिवारं – समाजञ्च समुन्नयति ।

उक्तञ्च नीतौ- **उद्यमेन हि सिद्धयन्ति कार्याणि न मनोरथैः।**

**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः**[2] ।।

केचन् आलस्येण हिंसा-व्यभिचार-अनैतिक-दुष्कर्मैःस्वं स्वपरिवारं समाजस्य च अवनतिः कुर्वन्ति । दुर्गुणानां ध्वंसेन सद्गुणानां धारणेन आत्मविकासः भवति। दुखस्य विषयोऽयं यत् वर्तमाने बौद्धिकस्तरः तु अस्ति परञ्च आध्यात्मिकस्तरः न्यूणः वर्तते । एतदेव कारणात् चेतनायाः स्तरःनिम्नः वर्तते। एतस्य कारणानि बहूनि सन्ति यथा-ईर्ष्या-द्वेषः-अज्ञानं-अहंकारः-भ्रमः-सन्देहः-असत्यभाषणः-छलः-कपटः-विकाराःस्वार्थपरायणता-दुर्व्यवहारादयाः। परञ्च पूर्णमानवे एते गुणाःभवन्ति - अहंकारस्याभावः-क्रोधाभावः-सेवाभावः-प्रेमभावः-त्यागभावः-धर्मानुकूलाचरणम्-सत्यभाषणम् प्रभृतिः गुणानां धारणात् चेतनायाः स्तरं वर्धते । चेतनायाः विकासः कर्तुं शक्यते ।

**उक्तञ्च- उर्ध्वं गच्छन्ति सत्त्वस्था,मध्ये तिष्ठन्ति राजसाः।**

**जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः** ।।[3]

संस्कृतवाङ्मये सर्वत्र व्यक्तित्वस्य विकासाय प्रेरकानि वचनानि सन्ति-

**सत्येन ब्रह्मचर्येण व्यायामेनाथ विद्यया ।**

**देशभक्तयात्मत्यागेन सम्मानार्हो सदा भवेत्।।**

**स्मृतिषु- एतद्देश प्रसूतस्य सकाशादग्रजन्मनः।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व मानवाः।।**[4]

**आयुर्बलं यशोवर्चः प्रजापशुवसूनि च।**

**ब्रह्मज्ञानं च मेधा त्वं नो देहि वनस्पते ।।**[5]

**नीतिशास्त्रे- सुवर्णपुष्पितां पृथिविं विचिन्वन्ति जनास्त्रयाः।**

**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।**

**अन्यत्र- नाभिषेको न संस्कारःसिंहस्य क्रियते मृगैः।**

**विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता ।।**[6]

अस्माकं पूर्वपुरुषाः उपनिष्त्सु महाभारत रामायणादिषु महाकाव्येषु च निर्दर्शितं सत्पथमुरिकृत्य महामानवाः सञ्जाताः येन पथा – शंकराचार्यः,राणाप्रतापः,गुरुगोविन्दः,शिवाजी,विवेकानन्दः,लोकमान्यतिलकः,महात्मागान्धी,रविन्द्रनाथप्रभृतयः बह्वाःसन्ति।

**कठोपनिषदि- उतिष्ठत् जाग्रत् प्राप्य वरान्निबोधयत क्षुरस्य धारा निशिथा दुर्गत्यया ।**[7]

**दुर्गमपथस्तत्कवयो वदन्ति ।।**

**केनोपनिषदि- इह चेदवेदीथ सत्यमस्ति न चेदवेदीथ महति विनष्टिः।**

**भूतेषु-भूतेषु विचित्य धीराःअस्मात् लोकात् अमृताः भवन्ति ।**[8]

**गीतायां-**

**उद्धरेदात्मनमात्मानं न आत्मानमवसादयेत् ।**

**आत्मैव हि आत्मनो बन्धु आत्मैव रिपुरात्मनः ।।**[9]

**क्लैब्यं मा स्म गम पार्थ नैतत्त्वयुपपद्यते ।**

**क्षुद्र हृदय दौर्बल्यं त्यक्तवोतिष्ठ परन्तपः।।**[10]

**प्रदीपः सर्व विद्यानामुपायःसर्वकर्माणाम् ।**

**आश्रयः सर्वधर्माणां शाश्वदान्वीक्षिकीमता ।।**[11]

स्वामी विवेकानन्दः व्यक्तित्व विषये कथयन्ति स्म, यत् मानवेषु या शक्तिः तस्या शक्तेः एकांशेन स्व देहरक्षणं मानवः करोति, तथा च

द्वितीयाशेंन मानवः अन्यान् प्रभावितुं प्रयतते, शरीरेण, गुणैः, प्रज्ञया, अध्यात्मद्वारा अन्यान् प्रभावयितुं सततं संलग्नोऽस्ति। तथा अन्यैः स्वंयमेव प्रभावितं भवति। अतः अन्यान् प्रभावयितृ शक्तिः एव व्यक्तित्वं अस्ति ।

वेदान्तदर्शने कठोपनिषदि एकस्य रथस्य दृष्टान्तेन मानव व्यक्तित्वस्य वर्णनं अस्ति- शरीरं रथं विद्धि , बुद्धिः सारथी, मनः प्रगृहमेव, यत्र कर्मेन्द्रियाणि व्यक्तेः संसारस्य ज्ञानाय गवाक्षाः सन्ति। भोगविषयी मार्गे रथोऽयं चलति तथा व्यक्तेः देहमनयोः मध्ये तादात्म्यं करोति विषयानां कर्मफलानां च भोक्ता भवति ।

साँख्य दर्शने तु व्यक्तित्व निर्माणाय अत्यन्त महत्वपूर्णविषयाः सन्ति । व्यक्तित्वं किमस्ति ? अत्रोच्यते- अस्माकं चेतन एवं अचेतन अंश मिलित्वा व्यक्तित्वस्य निर्माणं कुर्वन्ति, यः बाह्य परिवेशे अभिव्यक्तं भवति । तथा च तेन प्रभावितं अपि भवति ।

मनोवैज्ञानिकाः कथयन्ति – मानवस्य व्यक्तित्वं तस्य क्षमता स्वभाविक प्रवृतयःतथा मान्यतानां संघातः(समूहः) वर्तते येन ज्ञायते यत् अमुक व्यक्तिः अन्यस्मिन्न भिन्नोऽस्ति। मनोवैज्ञानिकानां एतस्मिन् कथने स्वाभाविकी शंङ्कोत्पद्यते यत् कः चिन्तयति?कः अनुभवति ? कः इच्छति? कः करोति ?शरीर मनस् अहंकारादयाः वातावरणस्य परिवर्तनेन परिवर्तिता भवन्ति । कः एतादृशः अस्ति यः स्थिरः वर्तते अपरिवर्तनशीलः अस्ति । साँख्यदर्शने एतेषां निरूपणं द्रष्टुं शक्यते –

द्वैतवादी दर्शनमिदं – प्रकृतिः पुरुषश्च द्वे तत्वे स्तः । प्रकृतिः जडा पुरुषः चेतनोऽस्ति । सांख्ये मानवस्य व्यक्तित्वं प्रकृतिः एवं पुरुष द्वयोः अन्तर्क्रियायाः परिणामः अस्ति ।

**उक्तञ्च- नानाविधैरुपायेरुपकारिण्यनुपकारिण पुंसः ।**
**गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ।।**[12]

प्रकृतिः जडा अस्ति, चेतनस्य अभावः वर्तते । चेतनाभावेऽपि प्रकृतिः सक्रिया अस्ति ।

**उक्तञ्च- हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ।।**[13]

सांख्यदर्शने व्यक्तित्वस्य त्रयोदशाङ्गानि सन्ति। एतेषु दश वाह्येन्द्रियाणि,अन्तःकरणानि अन्तराङ्गानि सन्ति। साँख्ययोगानुसारं संचित प्रारब्ध एवं क्रियमाण कर्मानुसारं नवीनशरीरं प्राप्तं भवति। सांख्ये व्यक्तित्व ज्ञानाय गुणानां अपि महत्वपूर्णं स्थानं वर्तते ।

त्रिविध गुणानि सन्ति-सत्व रजस् तमस् ।

सत्वगुणः-सत्वगुणस्य व्यक्तिः प्रखरबुद्धियुक्तः भवति। तस्य व्यवहारःसम्पूर्ण समाजस्य कल्याणाय भवति ।[14]

रजोगुणः- रजोगुणी आसक्तः ईच्छायुक्तः दुखीश्च भवति ।[15]

तमस्- तमोगुणः अज्ञानस्य प्रतीकः अस्ति। एतादृशः सम्भ्रान्तः भवति। योगदर्शने महर्षि पतञ्जलिना मानवस्य पूर्णकल्याणाय शारीरिक -मानसिक- आध्यात्मिकञ्च शुद्धयर्थं विकासार्थं वा योगसूत्राणां निरूपणं कृतः। योगस्य अष्टाङ्गानि सन्ति। पञ्चबहिरङ्गैः शारीरिक मानसिकञ्च स्वास्थ्यलाभः भवति। दुर्गणदोषाः च नश्यन्ति फलस्वरूपः शारीरिक मानसिकञ्च विकासः भवति। एवमेव अन्तरङ्गानि धारणाध्यानसमाधिद्वारा आध्यात्मिक् विकासो भवति। योगेन स्वान्ते निहित शक्तिनां विकासपूर्वकं परमचैतन्यस्य साक्षात्कारेण मोक्षवाप्तिः आनन्दलाभो वा भवति। योगक्रियाभिः सुप्तचेतनाशक्तेः विकासो भवति । सुप्ततन्तोनां जागरणं भवति, तेषां तन्तूषु नवकोशिकानां निर्माणं भवति। योगस्य क्रियाभिः सूक्ष्मस्नायुतन्त्रं दोषरहितः स्वस्थ च भवति। येन रक्त प्रवाहः सम्यक् भवति तथा च नूतन शक्त्याः विकासो भवति । एवमेव प्राणायामेन शारीरिक ग्रन्थिनां माँसपेशीनाञ्च आरोग्यं वर्धते। आसन प्राणायामादिः योगिक् क्रियाभिः पेन्क्रियाज, इन्सुलिन सम्यक् मात्रायां भवति। किमधिकं योगक्रियाभिः समस्त नाडीतन्त्रं, माँसपेशयः, अस्थयः, स्नायुमण्डलं, ग्रन्थयः, श्वसन प्रणालिः, उत्सर्जन प्रणालिः, रक्तसञ्चालकप्रणालिःच सम्यक् भवति । एतस्य व्याजेन मानवः स्वस्थः भवति, अतः तस्य मनसि शुद्धविचाराः प्रसन्नचितता सदैव भवति तथा च व्यक्तित्वस्य सर्वविधः विकासः भवति । अन्याः अपि तेन प्रभोविताः भवन्ति। हठदिपिका आदि ग्रन्थेषु विस्तरेण वर्णितं वर्तते ।

एवमेव धारणा-ध्यानादिः अभ्यासेन शरीरस्य प्रतिरक्षा प्रणालिः सुदृढा भवति, तन्त्रिका-तन्त्रं सम्यक् भवति , वृद्धावस्थायाः अवरोधः भवति। शरीरे आँक्सीजन सम्यक् भवति । हृदयगतिः सम्यक् भवति। उच्चरक्तचापं स्थिरं भवति। अस्थमा, एलर्जी, काँलस्ट्रोल, मासिकधर्मः, माईग्रेन इत्यादिषु लाभः भवति । ध्यानेन मानसिक शान्तिः, बुद्धिशुद्धिश्च भवति। परिणामस्वरूपः चैतन्यस्य प्रकाशो भवति । सदैव मनुष्यः सकारात्मकः भवति। उच्च एवं शुद्धविचाराः आगच्छन्ति – सर्वविध विकासः भवति। मानवःयशः कीर्तिं च आप्नोति । किमधिकं तस्य सर्वविधः विकासः योगेन भवति ।

न्यायदर्शने तु सर्वविधव्यक्तित्व विकासाय महर्षिः गौतमः सूत्रयति- **दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापायेतदन्तरापायात् अपवर्गः।**[16]

मीमांसादर्शने कर्मणा व्यक्तित्व विकासः भवति ।कर्मैव तारकं प्रत्यूहवारकं, मीमांसायां कर्मैव प्रधानं वर्तते । मीमांसकाः कर्मैव धर्मः कथयन्ति। वेदाज्ञा पूर्वकं कृतं कर्म धर्मस्य लक्षणमस्ति। एवमेव यज्ञादिः धर्मः एव कर्मः अस्ति। कर्म करणात् मानवस्य व्यक्तित्वे सर्वेषां गुणानां वृद्धिर्भवति।

**श्रद्धां मेधां यशः प्रज्ञां बुद्धिं श्रियं बलम् ।**
**आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनः ।।**[17]

मीमांसायां वेदानुकूल कर्मैवोचितं वर्तते। **यज्ञेत् सर्वकामः।** मीमांसायाः उपदेशः वर्तते यत् हे मानवः! त्वं मनुर्भव तथा च दिव्यव्यक्तित्व निर्माणाय स्व जीवनं ददतु ।

उक्तञ्च- **मनुर्भव जनया दैव्यं जनम् ।**[18]

**मीमांसा यज्ञद्वारा समस्त व्यक्तित्वं परिपुष्टयति –**

**आयुर्यज्ञेन कल्पताम , प्राणो यज्ञेन कल्पताम् ।**
**चक्षुर्यज्ञेन् कल्पताम् , श्रोत्रं यज्ञेन कल्पताम् ।।**

**पृष्ठं यज्ञेन कल्पतां , यज्ञो यज्ञेन कलपताम् ।**

**प्रजापतेः प्रजा अभूम स्वर्देवा अगन्मामृता अभूम् ।।**[19]

आत्मविश्वासेन अपि व्यक्तित्वस्य विकासः भवति । संसारेऽस्मिन् समस्ताः आशाः आत्मविश्वासस्य भावनया प्राप्नोति । आत्महीनता पतनमस्ति ।

उक्तञ्च- **अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।**

**अजा पुत्रं बलिं दद्यात् देवोऽपि दुर्बल घातकः ।।**[20]

अन्यत् च- **अहमिन्द्रो न पराजिग्य इद्ध न मृत्यवेवतस्थे कदाचन ।**

अर्थात् – अहमिन्द्र शक्त्या सम्पन्नोऽस्मि । मृत्युः अपि मम श्रेष्ठता न हरति अतः हे ज्ञान बलेन सम्पन्नः मनुष्यः! त्वं स्व शरीरं समर्थं कुरु उतम कर्माणि कुरुष्व –

**शुक्रोऽसि भाजोऽसि स्वरसि ज्योतिरसि।**

**आप्नुहि श्रेयांसमति समं क्राम ।**[21]

मनुष्यः त्वं शुद्धः असि ,तेजोमयः असि, आनन्दमयः ज्योतिर्मयःच असि । आत्मविश्वासेन श्रेष्ठान् प्राप्य, अग्रे वर्धस्व ।

आत्मनिरीक्षेण अपि व्यक्तित्वस्य विकासः भवति अतः वेदे आदेशः अस्ति यत् – हे मानवः! त्वं आत्मनिरीक्षणं कुरु । स्वान्ते विद्यमानाः आसुरिवृत्तिनां नाशः कुरु । आत्मनिरीक्षणं कुर्यात् कुत्रचित् उल्लूकवत् मोहवृत्तिः(शंसयवृत्तिः) तु नास्ति , शशलूकवत क्रोधवृत्तिः तु नास्ति । श्वानवत् ईर्ष्यावृत्ति तु ना अस्ति , चक्रवाक् वत् कामवृत्तिः तु नास्ति, गरुडवत् मद्वृतिःश्(अभिमानवृत्तिः)तु नास्ति । गिद्धवत् लोभवृत्तिः तु नास्ति । चेत अस्ति तर्हि जहि । एतेषां षडवृत्तिनां त्यागेन अपि व्यक्तित्वविकासः भवति ।

उक्तञ्च- **उलूकयातुं शूशलूकयातुं जहि श्वातुमुत कोकयातुम्।**

**सुपर्णयातुमुत गृध्रयातुं दृषदेव प्रमृण रक्ष इन्द्र ।।**[22]

**निष्कर्षः-** समाजस्य भाविनागरिकनिर्माता स्तम्भसदृशःअस्ति दर्शनशास्त्रस्य इयं विद्या। प्रत्येकमानवस्य सर्वाङ्गीण विकासं कर्तुं दर्शनशास्त्रे निर्दिष्टमूल्यानां च धारणात् स्वस्य,समाजस्य,राष्ट्रस्य च महत् उपकारं कर्तुं शक्नोति। यतोहि श्रेष्ठानां सदा विस्तृता भावना भवति- उक्तञ्च

**अयं निजः परो वेति गणनालघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**[23]

ईश्वरं प्रति मानवं स्वपरिवारं समाजस्य च विकासार्थं समानमवसरं ददाति। परञ्च केचन एव स्वपुरुषार्थेण कर्तव्यनिष्ठया समर्पणेन उत्साहेन च स्वं स्वपरिवारं समाजञ्च उन्नयति । केचन आलस्येण अनैतिकतया हिंसया व्यभिचारादि दुष्कर्मैःस्वं स्वपरिवार समाजस्य च अवनतिःकुर्वन्ति । सद्गुणानां धारणेन आत्मविकासः भवति। दुखस्य विषयोऽयमस्ति यत् वर्तमाने व्यक्तेः बौद्धिकस्तरः तु अस्ति परञ्च आध्यात्मिकस्तरः न्यूणः वर्तते । एतस्मात् कारणात् चेतनायाः स्तरःनिम्नःअस्ति । एतस्य कारणानि बहूनि सन्ति यथा ईर्ष्या-द्वेषः-अज्ञानं-अहेकारः-भ्रमः-सन्देहः-असत्यभाषणः-छलं-कपटः-विकाराः-स्वार्थपरायणता-दुर्व्यवहार इत्यादयाः ।

**षड् दोषाः पुरुषेण हातव्या भूतिमिच्छता ।**

**निन्द्रा तन्द्रा भयं क्रोधं आलस्यं दीर्घसूत्रता ।।**[24]

पूर्णविकसित व्यक्तेः एते गुणाः भवन्ति- अहंकारस्याभावः-क्रोधाभावः-सेवाभावः-प्रेमभावः-त्यागभावः-धर्मानुकूलाचरणम्-सत्यभाषणम्- सदव्यवहार प्रभृतिःगुणानां धारणात् चेतनायाः स्तरं(विकासः) वर्धते ।

**अष्टौ गुणाःपुरुषं दीपयन्ति, प्रज्ञा सुशीलत्वदमौ श्रुतं च।**

**पराक्रमश्चबहुभाषिता च दानं यथाशक्तिःकृतज्ञता च।।**[25]

**तथा च- यो जागार तमृचःकामयन्ते। यो जागार तमु सामानि यन्ति ।।**[26]

वेदे चरित्रसुद्ध्यर्थं वचनं अस्ति**- चरित्रांस्ते शुन्धामि**[27]

**सन्दर्भग्रन्थसूचिः-**


1) पञ्चतन्त्र-राजपाल एण्ड सन्स, दिल्ली-2019
2) हितोपदेश-राजपाल पब्लिसिंग, दिल्ली-2014
3) गीता –गीता प्रैस गोरखपुर,2011
4) मनुस्मृति- गीता प्रैस गोरखपुर संस्करण-2011 एकादश संस्करण
5) गर्गसंहिता-9/7-गीता प्रैस गोरखपुर 2005
6) कात्यायन स्मृतिः- ओरियन्टल बुक एजेन्सी-पुना-2,
7) कठोपनिषद्-गीताप्रैस, गोरखपुर-2015
8) केनोपनिषद- गीताप्रैस, गोरखपुर-प्रथम संस्करण-1992
9) को.अर्थशास्त्र—मोतिलाल बनारसीदास, सैदमिहा बाजार लाहौर,1923
10) सांख्यकारिका-केशव मुद्रणालय, पाण्डेयपुर, पिसनहरिया वाराणसी-2
11) न्याय सूत्र- चौखम्बा संस्कृत सीरीज कार्यालय वाराणसी-2013
12) कर्मकाण्ड प्रदीपः भारतीयविद्या प्रकाशन वाराणसी,1966
13) ऋग्वेद-चौखम्बा संस्कृत प्रतिष्ठान वाराणसी-2020,
14) यजुर्वेद- चौखम्बा संस्कृत प्रतिष्ठान वाराणसी-2020,
15) सुभाषित रत्नाकर(स्फुट)- चौखम्बा संस्कृत सीरीज कार्यालय वाराणसी,18वां संस्करण,
16) अथर्ववेद- चौखम्बा संस्कृत प्रतिष्ठान वाराणसी-2020,
17) विदुर नीतिः- ठाकुरप्रसाद पुस्तकभण्डार, कचौडी गली, वाराणसी-सन् 2012

**पाद टिप्पणी: -**

[1]पञ्चतन्त्र-1/112

[2]हितोपदेश-श्लोक सं-36

[3]गीता/14/18

[4]मनुस्मृति- अध्याय-2

[5]गर्गसंहिता-9/7,कात्यायन स्मृतिः

[6]हितोपदेश भाग-2(सुहृद्भेदः)

[7]कठोपनिषद्-1.3.14

[8] केनोपनिषद-2 खण्ड. श्लोक-5

[9] गीता-अ.6.श्लोक-5

[10]गीता अ.-2,श.-3

[11]को.अर्थशास्त्र-1/2-

[12]सां कारिका-60

[13]सांख्यकारिका-10

[14]सां.का.-13

[15]सां.का.-14

[16]न्याय सूत्र-1/1/2

[17]कर्मकाण्ड प्रदीपः,एवं,संस्कृतरत्नमाला

[18]ऋ.10/53/06,

[19]यजुर्वेद-1/21

[20]सुभाषित रत्नाकर(स्फुट)

[21]अथर्ववेद-2/11/5

[22]ऋ.वेद-7/104/22

[23]पञ्चतन्त्रम्-5.38

[24]विदुर नीतिः-1/83

[25]वि.नीति-1/90

[26]ऋग्वेद-5/44/17

[27]यजुर्वेद-6/13